श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशेषाद्रिनाथदासेन कृतं

# ॥ श्रीपादुकासेवक रामानुजमहादेशिकन् (चिन्नाण्डवन्) मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीपादुकासेवक रामानुजमहादेशिकन् (चिन्नाण्डवन्) मङ्गळम् ॥

ज्ञानानुष्ठान वैराग्य शेवधिश्श्रितवत्सलः।
पादुका सेवकमुनिस्सन्निधत्तां सदा हृदि ॥ 1 ॥

प्राप्तसत्संप्रदायाय श्रीनिवासयतीशितुः।
मङ्गलं पादुकासेवि श्रीरामानुजयोगिने ॥ 2 ॥

संसारसागरे मज्जन्मादृशोद्धरणेच्छया।
सर्वधार्यूर्जकमघासंभवायास्तु मङ्गलम् ॥ 3 ॥

स्वभान्वब्दतुलासौम्यत्रयोदश्यन्त्यभे शुभे।
श्रीनिवासयतीन्द्रात्तसंन्यासायास्तु मङ्गलम् ॥ 4 ॥

शिखिने सोर्ध्वपुण्ड्राय लसद्यज्ञोपवीतिने।
त्रिदण्डविलसत्पाणिपङ्कजायास्तु मङ्गलम् ॥ 5 ॥

पद्माक्षतुलसीमालापवित्रालङ्कृतात्मने।
धृतकाषायवस्त्राय यतीन्द्रायास्तु मङ्गलम् ॥ 6 ॥

ज्ञानभक्तिविरक्त्यादि कल्याणगुणशालिने।
मङ्गलं वीतदोषाय त्रिजगत्पावनाङ्घ्रये ॥ 7 ॥

सर्वशास्त्रार्थविदुषे सदनुष्ठानशालिने।
मङ्गलं साधुसेव्याय दुर्वादिध्वान्तभानवे ॥ 8 ॥

विश्वत्राणैकदीक्षाय विष्णुरूपाय मङ्गलम्।
श्रीशश्रीशठकोपादिसूरिसद्दृष्टिशालिने॥ 9 ॥

श्रीमत्सत्पथरक्षाख्यग्रन्थरक्षितसाधवे।
गुरवे सर्वसंभाव्यसार्वज्ञायास्तु मङ्गलम्॥ 10 ॥

जन्माष्टमीजयन्त्यादि वेधतत्त्वार्थदर्शिने।
निर्मत्सराभिगम्याय नित्यशुद्धाय मङ्गलम्॥ 11 ॥

तत्क्रतुन्यायतत्त्वार्थविदुषेऽष्टाङ्गबुद्धये।
श्रीमद्रहस्यत्रितयसारज्ञायास्तु मङ्गलम्॥ 12 ॥

गोपालदेशिकमणेराह्निकव्याक्रिया कृता।
येनाचार्यवरेणास्तु तस्मै बहुल मङ्गलम्॥ 13 ॥

विचारग्रन्थनिर्मात्रे गुरुनिष्ठोक्तिनिष्ठयोः।
सत्संप्रदायसिद्धाय यतिराजाय मङ्गलम्॥ 14 ॥

श्रीनिवासमुनीन्द्राङ्घ्रिध्यानसंशुद्धचेतसे।
गुरुसंभावनातत्त्वद्रष्ट्रे भवतु मङ्गलम्॥ 15 ॥

मुनित्रितयसिद्धान्तनिर्धारणपटीयसे।
सर्वतन्त्रस्वतन्त्राय यतिराजाय मङ्गलम्॥ 16 ॥

सच्छिष्यसाधुनिक्षिप्तसंप्रदायार्थसंपदे।
प्रशान्तहृदयायास्तु मङ्गलं मङ्गलात्मने॥ 17 ॥

शेषाद्रिनाथदासेन पठतां मङ्गलावहम्।
व्यलेखि मङ्गलं पादूसेवीलक्ष्मणयोगिनः॥ 18 ॥

॥ इति श्रीपादुकासेवक रामानुजमहादेशिकन् मङ्गळं समाप्तम्॥